12077CH11

## एकादशः पाठः

# कार्याकार्यव्यवस्थितिः

प्रस्तुत पद्य श्रीमद्भगवद्गीता के षोडश अध्याय से संकलित हैं। मोहग्रस्त अर्जुन को कहे गए ये वचन देशकालातीत हैं अर्थात् सार्वजनीन सार्वकालिक एवं सार्वभौमिक हैं। अतः आज भी हम सभी के लिए उतने ही ग्राह्य हैं जितने उस समय अर्जुन के लिए थे। इन श्लोकों में दैवी संपद् और आसुरी संपद् का भेद दिखाते हुए और मनुष्य के लिए एक स्वस्थ एवं संयमित जीवन जीने के लिए तथा मृत्यु के पश्चात् भी सद्गति प्राप्त करने के लिए कार्याकार्य का विवेचन किया गया है जो छात्रों के लिए तथा जनसामान्य के लिए आज विचारणीय एवं स्वीकार्य हैं।

**श्रीभगवानुवाच**

**अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।**
**दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्॥1**

**अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।**
**दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम्॥2**

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति संपदं दैवीमभिजातस्य भारत॥3**

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य पार्थ संपदमासुरीम्॥4**

**दैवी संपद्विमोक्षाय निबन्धायासुरी मता।**
**मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव॥5**

**प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः।**
**न शौचं नापि चाऽऽचारो न सत्यं तेषु विद्यते॥6**

© NCERT not to be republished

**एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः।**
**प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः।।7**

**इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।**
**इदमस्तीदमपि मे भविष्यति पुनर्धनम्।।8**

**असौ मया हतः शत्रुर्हनिष्ये चापरानपि।**
**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।।9**

**आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया।**
**यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता।।10**

**अनेकचित्तविभ्रान्ता मोहजालसमावृताः।**
**प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ।।11**

**आत्मसंभाविताः स्तब्धा धनमानमदान्विताः।**
**यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम्।।12**

**अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः।**
**मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः।।13**

**तानहं द्विषतः क्रूरान्संसारेषु नराधमान्।**
**क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु।।14**

**आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि।**
**मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम्।।15**

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।16**

## शब्दार्थाः टिपण्यश्च

**सत्त्वसंशुद्धिः** – अन्तःकरण की निर्मलता या सम्यक् शुद्धि
**दमः** – इन्द्रियनिग्रह, इन्द्रियों पर संयम

© NCERT not to be republished

**आर्जवम्** – अवक्रता, अकुटिलता, सरलता
**अपैशुनम्** – चुगलखोरी का अभाव
**भूतेषु** – सभी प्राणियों पर
**अलोलुपत्वम्** – विषयों के प्राप्त होने पर भी इन्द्रियों में विकार न होना।
**मार्दवम्** – अक्रूरता
**ह्री** – अकार्य के आरम्भ में उसको रोकनेवाली लोकलज्जा।
**अचापलम्** – प्रयोजन के बिना भी वाणी, हाथ आदि को चलाते रहना चापल उसका अभाव-अचापल
**धृतिः** – धैर्य, संयम
**शौचम्** – प्रसङ्गानुसार यहाँ कपट, झूठ आदि से दूर रहना, आभ्यन्तर शौच अभिप्रेत है, शरीरशुद्धिस्वरूप केवल बाह्य स्वच्छता नहीं।
**नातिमानिता** – पूज्यों के प्रति नम्रता।
**दम्भ** – स्वयं को प्रख्यापित करना
**दर्प** – धन या स्वजनादि के कारण दूसरे की उपेक्षा का हेतु गर्वविशेष
**अभिमान** – स्वयं में श्रेष्ठता का अध्यारोप
**पारुष्यम्** – सामने ही रूखा बोलने का स्वभाव
**दैवीसंपत्** – फलकामना से रहित सात्त्विकी क्रिया
**आसुरीसंपत्** – शास्त्रनिषिद्ध, फलाशापूर्वक अंहकार सहित राजसी-तामसी क्रिया
**निबन्धाय** – नियत संसारबन्धन के लिए
**क्षयाय जगतः** – संसार के विनाश के लिए
**चापरानपि** – च+अपरान्+अपि और दूसरों को भी
**आढ्योऽभिजनवानस्मि** – आढ्यः+अभिजनवान्+अस्मि-धनवान और कुलीन हूँ
**यक्ष्ये** – यज्ञ करूँगा
**मोदिष्ये** – प्रसन्न होऊँगा।
**प्रसक्ताः** – आसक्त, लीन
**आत्मसंभाविताः** – स्वयं को ही पूज्य मानने वाले
**स्तब्धाः** – नम्रतारहित
**दम्भेनाविधिपूर्वकम्** – शास्त्रविधि से रहित दम्भपूर्वक
**अभ्यसूयकाः** – द्वेष रखने वाले
**क्षिपाम्यजस्रम्** – क्षिपामि + अजस्रम्-फेंक देता हूँ निरन्तर

© NCERT not to be republished

# अभ्यासः

**1. प्रश्नानामुत्तराणि एकपदेन लिखत–**

(क) दैवी संपद् कस्मै मता?
(ख) कामभोगेषु प्रसक्ताः कुत्र पतन्ति?
(ग) ईश्वरः नराधमान् कासु योनिषु क्षिपति?
(घ) त्रिविधं कस्य द्वारम्?

**2. प्रश्नानामुत्तराणि पूर्णवाक्येन लिखत–**

(क) जगतः क्षयाय के प्रभवन्ति?
(ख) अज्ञानविमोहिताः जनाः किं विचारयन्ति?
(ग) मनुष्यः किं त्यजेत्?
(घ) नरकेऽशुचौ के पतन्ति?

**3. रेखांकितपदमाधृय प्रश्ननिर्माणं कुरुत–**

(क) भूतेषु दया एव दैवी सम्पद्।
(ख) आसुरी सम्पद् निबन्धाय मता।
(ग) आसुराः जनाः प्रवृत्तिं निवृत्तिं च न विदुः।
(घ) मूढाः जन्मनि जन्मनि हरिमप्राप्यैव अधर्मां गतिं यान्ति।

© NCERT not to be republished

**4. शुद्धकथनानां समक्षम् 'आम्' अशुद्धकथनानां समक्षं च 'न' इति लिखत–**

(क) नरकस्य द्वारम् पञ्चविधम्।
(ख) आसुरीवृत्तियुक्ताः जनाः दम्भेनाविधिपूर्वकं यजन्ते।
(ग) नष्टात्मानः अल्पबुद्धयः जगतः हिताय प्रभवन्ति।
(घ) तेजः क्षमा धृतिः इत्यादीनि आसुरीसंपदः अंगभूतानि।
(ङ) दम्भः दर्पः अभिमानश्च दैवीसंपदः अंगभूतानि।
(च) अज्ञानविमोहिताः जनाः कोऽन्योऽस्ति सदृशो मया इति चिन्तयन्ति।

**5. श्लोकान्वयं पूरयत–**

(क) असौ मया हतः शत्रुर्हनिष्ये चापरानपि।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी।
अन्वयः– मया..........................शत्रुः हतः, अपरान्..........................हनिष्ये, अहम् ..........................अहं भोगी, अहं सिद्धः,.........................., सुखी।

(ख) दैवी संपद् विमोक्षाय निबन्धायासुरी मता।
मा शुचः संपदं दैवीमभिजातोऽसि पाण्डव।।
अन्वयः– विमोक्षाय.........................संपद्, आसुरी (च) निबन्धाय.......................। पाण्डव!
मा...........................दैवीं संपदम्............................असि।

**6. भावार्थं समुचितपदैः पूरयत–**

(क) इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम्।
इदमस्तीदमपि मे भविष्यति पुनर्धनम्।।
श्रीकृष्णः कथयति यत् मूढः अज्ञानविमोहितः जनः...........................भवति, किञ्चिद् अल्पमपि प्राप्य...........................भवति यत् अद्य मया इदं प्राप्तम् अतः अहम् अन्यम् अपि स्वमनोरथं शीघ्रमेव...........................यत् किञ्चिद् ममास्ति तत्तु मम अस्त्येव परमन्यत् सर्वं...........................च मम एव भविष्यति।

| प्राप्तुं समर्थः, धनमैश्वर्यं, आत्माभिमानी, अतिलोलुपः |
|---|

(ख) त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्।
कर्तव्याकर्तव्यं...........................भगवान् श्रीकृष्णः अर्जुनस्य माध्यमेन अस्मान् सर्वान् ...................................यत् कामः, क्रोधः,........................... एतानि त्रीणि नरकस्य द्वाररूपाणि अतः यः जनः...........................नाशं नेच्छति अपि तु स्वकीयं कल्याणमिच्छति सः एतानि द्वाराणि...........................सर्वप्रयत्नैः च एतेषां त्रयाणां त्यागं कुर्यात् येनैतानि त्रीणि द्वाराणि सदैव तस्य कृते...........................तिष्ठेयुः सः च उन्नतिपथे अग्रसरो भवेत्।

| नोद्घाटयेत्, लोभश्च, आत्मनः, वर्णयन्, पिहितानि, बोधयति |
|---|

**7. समास-विग्रहं समस्तपदं वा लिखित्वा समासस्य नाम अपि लिखत**

यथा सत्त्वसंशुद्धिः– सत्त्वानां संशुद्धिः– षष्ठी तत्पुरुष
(क) अज्ञानम्–
(ख) उग्रकर्माणः–
(ग) मनोरथम्–
(घ) नराधमान्–
(ङ) त्रिविधम्–

© NCERT not to be republished

**8. वाच्यपरिवर्तनं कृत्वा लिखत–**

यथा– इदमद्य मया लब्धम्– इदमद्य अहं लब्धवान्/लब्धवती।

(क) अहं तान् आसुरीषु योनिषु क्षिपामि–..........................

(ख) असौ मया हतः–..........................

(ग) अल्पबुद्धयः उग्रकर्माणः जगतः क्षयाय प्रभवन्ति।..........................

(घ) मया यक्ष्यते दीयते च..........................

(ङ) अनेकचित्तविभ्रान्ताः मोहजालसमावृताः नरकेऽशुचौ पतन्ति।..........................

**9. प्रकृति-प्रत्यय-विभागं कुरुत–**

यथा प्रवृत्तिः– प्र उपसर्गः, वृत्, क्तिन् प्रत्ययः

(क) अवष्टभ्य – ..........................

(ख) मता – ..........................

(ग) अलोलुपत्वम् – ..........................

(घ) प्रद्विषन्तः – ..........................

(ङ) विमोहिताः – ..........................

© NCERT not to be republished

## योग्यताविस्तारः

कर्तव्याकर्तव्यविषये कतिपयानि अन्यानि पद्यानि अपि ज्ञातव्यानि–

1. **खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।**
   **आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥**

2. **मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।**
   **मनस्यन्यद् वचस्यन्यद् कर्मण्यन्यद् दुरात्मनाम्॥**

3. **अष्टौ गुणाः पुरुषं दीपयन्ति,**
   **प्रज्ञा च कौल्यं च दमः श्रुतं च।**
   **पराक्रमश्चाबहुभाषिता च,**
   **दानं यथाशक्तिः कृतज्ञता च॥**

4. **षड्दोषाः पुरुषेणेह हातव्याः भूतिमिच्छता।**
   **निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता॥**

5. उत्साहसम्पन्नमदीर्घसूत्रं, क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदं च, लक्ष्मीः स्वयं याति निवासहेतोः॥

6. यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः
विज्ञानशौर्यविभवार्यगुणैः समेतम्।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः,
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते॥

© NCERT not to be republished